# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ७** | गुणाः - ७० |
| विषयः – नव्यन्यायः | **कोड – C.E.1.1.1** | समयः – ०३ तः ०६ पर्यन्तम् |
| दिनाङ्कः – १२/१२/२०१६ | सन्दर्भग्रन्थः – न्यायसिद्धान्तमुक्तावली | |

---

विभागः-१

प्रश्नः-१ द्वयोः व्याख्यां विशदतया लिखत । (०८)

(१) मङ्गलस्य कर्तव्यत्वे प्रमाणानि प्रतिपादयत।

(२) चूडामणिकृतविदुरिति मङ्गलं विवेचयत।

(३) कार्यकारणभावं व्याख्यात।

प्रश्नः-२ द्वयोरेकस्य विस्तृतव्याख्या देया। (०८)

(१) ईश्वरास्तित्वं सप्रमाणं निरूपयत।

(२) सद्रव्येति मङ्गलश्लोकं वस्तुनिर्देश्यत्वदिशा प्रतिपादयत।

प्रश्नः-३ द्वयोः टिप्पणीं दत्त। (०४)

(१) सप्तपदार्थाः।

(२) तमः।

(३) शक्ति-सादृश्यौ ।

प्रश्नः-४ पञ्चानाम् उत्तरम् एकैकवाक्येन साधयत। (०५)

(१) कारिकावल्याः कर्ता कः?

(२) सप्तमः पदार्थः कः?

(३) वैशेषिकमते कति पदार्थाः?

(४) भावपदार्थाः कति ?

(५) ताण्डवपण्डितः कः?

(६) समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात् इति के?

(७) कादम्बर्यां मङ्गलमस्ति न वा?

विभागः-२

प्रश्नः-५ द्वयोः व्याख्यां विशदतया लिखत । (०८)

(१) तमसः दशमद्रव्यत्वं प्रतिपादयत।

(२) व्यक्तेरभेदस्तुल्यत्वसाङ्कर्याणां स्वरूपं लक्षणोदाहरणैः व्याख्यात।

(३) अभावस्वरूपं सकारिकाभिः निरूपयत।

प्रश्नः-६ द्वयोरेकस्य विस्तृतव्याख्या देया। (०८)

(१) जातिबाधकसङ्ग्रहं स्पष्टं व्याख्यात।

(२) नित्यत्वे सतीति लक्षणं सदलसार्थक्यं निरूपयत।

प्रश्नः-७ द्वयोरेकस्य पूर्तिः कार्या। (०२)

(१) "द्रव्यं गुण------------कीर्तिताः"॥

(२) "अन्यथासिद्धि-------------परिकीर्तितम्"॥

प्रश्नः-८ द्वयोरेकस्य पूर्तिः कार्या। (०२)

(१) "व्यापकत्वात् ------------परिकीर्तितः"॥

(२) "घटादीनां------------प्रकीर्तितः"॥

## विभागः-३

प्रश्नः-९ द्वयोः व्याख्यां विशदतया लिखत । (०८)

(१) सप्तपदार्थानां साधर्म्याणि स्पष्टयत।

(२) नित्यद्रव्यभिन्नानां साधर्म्यं व्याख्यात।

(३) नवद्रव्याणां साधर्म्याणि प्रतिपादयत।

प्रश्नः-१० द्वयोरेकस्य विस्तृतव्याख्या देया। (०८)

(१) सामान्यलक्षणं यथा मुक्तावलि व्याख्यात।

(२) पञ्चान्यथासिद्धयः स्पष्टं व्याख्यात।

प्रश्नः-११ द्वयोः टिप्पणीं दत्त। (०४)

(१) व्यापकत्वम् ।

(२) अभावः।

(३) समवायः।

प्रश्नः-१२ पञ्चानाम् उत्तरम् एकैकवाक्येन साधयत। (०५)

(१) मुक्तावल्याः कर्ता कः?

(२) कति द्रव्याणि?

(३) कर्माणि कति?

(४) समवायलक्षणं किम्?

(५) द्रव्यत्वं केषां साधर्म्यम्?

(६) कः प्रागभावः?

(७) द्रव्याणां साधर्म्यं किम्?

★★★

समाधानानि

कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ७** गुणाः - ७०

विषयः – नव्यन्यायः **कोड – C.E.1.1.1** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – १२/१२/२०१६ सन्दर्भग्रन्थः – न्यायसिद्धान्तमुक्तावली

प्रश्नः - ४

१. विश्वनाथपञ्चाननभट्टाचार्यः।

२. अभावः।

३. सप्त।

४. षट्।

५. भवः(ईश्वरः)

६. नव्याः नैयायिकाः।

७. अस्ति।

प्रश्नः - ७

१. द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम्।
समवायस्तथाभावः पदार्थाः सप्तकीर्तिताः॥

२. अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम्॥

प्रश्नः - ८

१. व्यापकत्वात् पराऽपि स्यात् व्याप्यत्वादपरापि च।
अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः॥

२. घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः॥

प्रश्नः - १२

१. विश्वनाथपञ्चाननभट्टाचार्यः।

२. नव।

३. पञ्च।

४. नित्यसम्बन्धत्वम्।

५. नवद्रव्याणाम्।

६. विनाश्यभावः।

७. ज्ञेयत्वं, अभिधेयत्वं, प्रमेयत्वं वा।